# मन्त्र पुष्पम्

योऽपां पुष्पं वेद पुष्पवान् प्रजावान् पशुमान् भवति । चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

अग्निर्वा अपामायतनम् । आयतनवान् भवति । योऽग्नेरायतनं वेद । आयतनवान् भवति । आपोवा अग्नेरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

वायुर्वा अपामायतनम् । आयतनवान् भवति । यो वायोरायतनं वेद । आयतनवान् भवति । आपो वै वायोरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

असौ वै तपन्नपामायतनम् आयतनवान् भवति । योऽमुष्यतपत आयतनं वेद । आयतनवान् भवति । आपो वा अमुष्यतपत आयतनम् ।आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

चन्द्रमा वा अपामायतनम् । आयतनवान् भवति । यः चन्द्रमस आयतनं वेद । आयतनवान् भवति । आपो वै चन्द्रमस आयतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ।

नक्ष॑त्त्रा॒णि॒ वा अ॒पामा॒यत॑न॒म् । आ॒यत॑नवान् भवति । यो॑
नक्ष॑त्त्राणामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै
नक्ष॑त्राणामा॒यत॑न॒म् । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ ।
यो॑ऽ॒पामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

प॒र्जन्यो॒ वा अ॒पामा॒यत॑नम् । आ॒यत॑नवान् भवति । यः प॒र्जन्य॑स्या॒यत॑नं॒
वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै पर्जन्यस्या॒यत॑न॒म् । आ॒यत॑नवान्
भवति । य ए॒वं वेद॑ । यो॑ऽ॒पामा॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति ।

स॒ंव॒त्स॒रो वा अ॒पामा॒यत॑न॒म् । आ॒यत॑नवान् भवति । यः
सं॑वत्स॒रस्या॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । आपो॒ वै
सं॑वत्स॒रस्या॒यत॑नं॒ वेद॑ । आ॒यत॑नवान् भवति । य ए॒वं वेद॑ । यो॑ऽ॒प्सु
नाव॒ं प्रति॑ष्ठितां॒ वेद॑ । प्रत्ये॒व ति॑ष्ठति ।

ॐ रा॒जा॒धि॒रा॒जाय॑ प्रस॒ह्य साहिने॓ । नमो॑ व॒यं वै॓श्रव॒णाय॑ कुर्महे॑ । स मे॒
कामा॒न् काम॒ कामा॑य॒ मह्यम् । का॒मे॒श्व॒रो वैश्रव॒णो॒ द॑दातु । कु॒बे॒राय॑
वैश्रव॒णाय॑ । म॒हा॒राजा॒य॒ नमः॑ ।

ओ॓ं तद्ब्रह्म । ओ॓ं तद्वायुः । ओ॓ं तदात्मा ।
ओ॓ं तद्सत्यम् । ओ॓ं तत्सर्वम् । ओ॓ं तत्-पुरोर्नमः ॥

अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु
त्वं यज्ञस्त्वं वषट्कारस्त्व-मिन्द्रस्त्वगं
रुद्रस्त्वं विष्णुस्त्वं ब्रह्मत्व॑ प्रजापतिः ।
त्वं तदाप आपो ज्योतीरसोऽ॒मृतं ब्रह्म भूर्भुवस्सुवरोम् ।

ईशानस्सर्व विद्यानामीश्वर स्सर्वभूतानां
ब्रह्माधिपतिर्-ब्रह्मणोऽधिपतिर्-ब्रह्मा शिवो मे अस्तु सदा शिवोम् ।

तद्विष्णोः परमं पदगं सदा पश्यन्ति
सूरयः दिवीवचक्षु राततं तद्वि प्रासो
विपस्यवो जागृहान् सत्समिन्धते
तद्विष्णोर्य-त्परमं पदम् ।

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः ।

Web Url: http://www.vignanam.org/veda/mantra-pushpam-devanagari.html